श्री महात्रिपुरसुंदरी षट्कं

श्री महात्रिपुरसुंदरी षट्कं

मनोज्ञमणिकुंडलां महितचक्रराजालयां
मनोऽंबुजविहारिणीं परशिवस्य वामांकगां |
महाहरिमुखामरप्रणतपादपंकेरुहां
महात्रिपुरसुंदरीं मनसि भावये संततं || 1 ||

मतंगमुनिपूजितां मथितपापसंघां जवा-
-न्मदारुणितलोचनां मदमुखारिनिर्वापिणीं |
मनःसु यमिनां सदा स्थितिविहारिणीं मोदतो
महात्रिपुरसुंदरीं मनसि भावये संततं || 2 ||

विचित्रकविताप्रदां नततते‍र्विलंबं विना
विधींद्रहरिवंदितां विधिनिषेधसक्तार्चितां |
विनायकविभावसूद्भवविभासिपार्श्वद्वयां
महात्रिपुरसुंदरीं मनसि भावये संततं || 3 ||

विनिंदितविभावरीविटसहस्रगर्वाननां
विनिर्मितजगत्त्रयीं विधुसमानमंदस्मितां |
विबोधनपटीयसीं विनतसंततेः सत्वरं
महात्रिपुरसुंदरीं मनसि भावये संततं || 4 ||

विमानचरमानिनीविहितपादसेवां मुदा
विशालनयनांबुजां विधृतचापपाशांकुशां |
विशुद्धिसरसीरुहे कृतनिजासनां सर्वदा
महात्रिपुरसुंदरीं मनसि भावये संततं || 5 ||

विरागिजनसेवितां विमलबुद्धिसंदायिनीं
विराधरिपुपूजितां विविधरत्नभूषोज्ज्वलां |
विरिंचिहरिसुंदरीकलितचामरावीजनां
महात्रिपुरसुंदरीं मनसि भावये संततं || 6 ||

इति शृंगेरि श्रीजगद्गुरु श्रीसच्चिदानंदशिवाभिनवनृसिंह भारतीस्वामिभिः विरचितं श्री महात्रिपुरसुंदरी षट्कं |